# षष्ठोऽङ्कः ।

(नेपथ्ये ।)

**युद्धोद्योगजनश्रुतिप्रबलवत्खड्गेन यत्नं विना**
**जित्वा द्राक् सगणं महेन्द्रमखिलाँल्लोकान् स्वकीयौजसा ।।**
**हृत्वा सर्वसमृद्धिमेति विधुतप्रत्यर्थिशङ्कोऽचलां**
**सन्तन्वन्प्रचलां हिरण्यकशिपुस्स्वीयैर्वृतस्साम्प्रतम् ।।१।।**

(ततः प्रविशति यथानिर्दिष्टो हिरण्यकशिपुः ।)

(प्रविश्य ।)

**हिरण्यकशिपुः -** (सानन्दम् । सश्लाघम् ।) अहो गुरुचरणानां प्रौढतरः प्रभावः ।

**अरण्यस्थोऽपि साम्राज्यं क्षीणाङ्गोऽपि बलिष्ठताम् ।।**
**मर्त्योऽप्यमर्त्यतामेति यत्प्रसादलवाद्द्रुतम् ।।२।।**

**शण्डः -** (सविनयम् ।) एवमेव । परं गुरुप्रभावस्नेहयोगेनोद्धटो भवत्प्रतापानलः प्रकाशयति त्रिलोकीम् ।

यतस्तव ।

**बाणज्याविकलस्य मार्द्दववतो यत्किञ्चिदाकुञ्चनाद्-**
**भ्रूकोदण्डवरस्य पश्य निखिला देवा दिवं मेदिनीम् ।।**
**त्यक्त्वा वीरवरा निलिल्युरधुनाऽष्टौ लोकपालाः प्रभो**
**त्वद्दोर्दण्डसुचण्डिमास्पदमहो न क्वापि लोकामहे ।।३।।**

**हिरण्यकशिपुः -** (सर्वतोऽवलोक्य । सन्यक्कारम् ।) आः किमिदमतथ्यं कत्थसे । सर्वलोकप्रपीडनपरं लोकपालाऽधमं यमं साम्प्रतमजित्वा को वाऽस्मत्प्रतापः । यतः ।

**शालावृकं वृकं वा किं विशस्याऽस्ति प्रशंसनम् ।।**
**यथा केसरिणो लोके करिकुम्भप्रपाटनात् ।।४।।**

तदाऽऽनीयतामस्मदीया गदा गच्छामस्तावत्तं जेतुम् ।

(इति साटोपं परिक्रामति ।) (''**शालावृकम्**'' इत्यादि पठति ।)

**कालदंष्ट्रः** - (निष्क्रम्य । गदां गृहीत्वा प्रविश्य ।) महाराज प्रतिगृह्यतामियं गदा प्रत्यर्थिपृतनापललोलुपा या किल सदा ।

**हिरण्यकशिपुः** - (सहर्षम् ।) (दक्षिणहस्तेन गृहीत्वा वामहस्तेन परामृश्य ।)

**स्वास्फालप्रतिभिन्नविग्रहगलत्कीलालजम्बालिता**
**वल्लूरोद्भटगन्धभूरिभयदा दुर्दर्शना विद्विषाम् ।।**
**स्फीतासृक्तटिनीतटाकजनिका स्वाघाततः संस्फुटद्-**
**दिग्दन्तावलकुम्भमौक्तिकलवैः किर्मीरितेयं गदा ।।५।।**

(इति साटोपं परिक्रामन् ।) तदियमेवालं परेतराजं परेततां प्रापयितुम् ।

**कालदंष्ट्रः** - एवमेव यदाह महाराजः ।

**हिरण्यकशिपुः** - (संयमनीं प्रति गमनोद्योगं नाटयति ।)

(नेपथ्ये वीणाध्वनिः ।)

**हिरण्यकशिपुः** - (श्रुत्वा ।) किमसौ देवर्षिस्सम्प्राप्तः । वन्दनीयः खलु विजयकाङ्क्षिभिः । (इति तथैव तिष्ठति ।)

(ततः प्रविशति नारदः ।)

**हिरण्यकशिपुः** - (उपसृत्य सविनयं प्रणमति ।)

**नारदः** - विजयतां दैत्येश्वरः ।

**हिरण्यकशिपुः** - भवत्प्रसादात् ।

**नारदः** - (सस्मितम् ।) अयि दैत्येश्वर निस्सपत्नसाम्राज्यस्य तव कोऽसौ संरम्भ इव परिदृश्यते ।

**हिरण्यकशिपुः** - भगवन् ।

**लोके क्रूरतराणां क्रूरतरो यः कृतान्तसञ्ज्ञोऽस्ति ।।**
**कर्त्तुं वशंवदं तं संरम्भोऽयं विजृम्भते सद्यः ।।६।।**

**नारदः** - (स्वगतम् ।) रक्षणीयः किल दैत्याभिभवान्महाभगवद्भक्तो धर्मराजः ।

(प्रकाशम् ।) (किञ्चिद्विहस्य ।) अहो दैत्याधिप एतादृशस्योपरि लोकैककवीरस्य तवायं संरम्भः अमङ्गलश्चायमुपक्रमः । (अङ्गुल्या दक्षिणदिशं प्रदर्श्य ।) यतः ।

**एतस्यां दिशि पापिनः प्रतिदिनं पञ्चत्वमाप्ताः प्रभो**
**प्रेतावासमहो परेतकमितुर्गेहं व्रजन्ति क्रुधा ।।**
**नीता याम्यभटैः पतन्ति नरके बीभत्सिते भर्त्सितास्-**
**तस्मात्तद्गमनं ह्यमङ्गलतरं नास्माकमानन्ददम् ।।७।।**

किञ्च ।

**ऋद्ध्या हीनतरेयं दुर्गन्धैर्दुःखदा विनिन्द्या च ।।**
**कमिता विष्णोर्दासस्तस्य जयेऽप्यस्ति किं महाश्लाघा ।।८।।**

**हिरण्यकशिपुः -** (क्षणं विमृश्य ।) आः विष्णोर्दास इति श्रवणेन स्मृतं मया । कुहकाग्रगण्यो विष्णुरेव सर्वानर्थकारणम् । यतः ।

**अस्माकं सहजो रिपुस्स सततं ख्यातश्च वीराग्रणीः**
**प्रेष्ठं मत्सहजं युवानमघृणो घोणी स्वयं मायया ।।**
**भूत्वा तं विददार यत्तदधुना जेयो मया निश्चितं**
**यद्वा दक्षिणदिक्पतेर्हि सदनं प्राप्यः स्वदासस्य सः ।।९।।**

तेन कृतममङ्गलोपक्रमेण । दिक्पालास्तु स्थालीपुलाकन्यायेन सर्वेऽपि परीक्षिताः ।

(इति सक्रोधं गदां परिभ्रामयन् परिक्रामति ।
''**अस्माकं सहजो रिपुः**'' इत्यादि पुनः पुनः पठति ।)

(कालदंष्ट्रादयस्सर्वेऽपि साधु साधु इति प्रशंसन्ति ।)

**नारदः -** अयि दैत्येश्वर गच्छामस्तावल्लोकपर्यटनाय ।

**हिरण्यकशिपुः -** (सविनयम् ।)

**ब्रह्मन् पर्यटनं तवास्ति शमलध्वंसाय लोकस्य यत्**
**स्वीयामित्रचयेषु यस्य हृदयं तुल्यं सदा निर्मलम् ।।**

**वीणानादसुधासमुद्रसुझषो ज्ञानार्कपूर्वाचलस्-**
**स त्वं सत्वरमानिधेहि सुकरं मन्मूर्ध्नि ते सौख्यदम् ।।१०।।**

**नारदः** - (तथा करोति ।)

**हिरण्यकशिपुः** - (सानन्दम् ।) अनुगृहीतोऽहं भगवता । तदहमपि सहजशत्रुं तं जेतुं गच्छामि ।

(इति निष्क्रान्ताः ।)

(ततः प्रविशति पटाक्षेपेण चित्रसेनो मातलिश्च ।)

(प्रविश्य ।)

**मातलिः** - (निःश्वस्य ।) अयि चित्रसेन किं ब्रवीमि साम्प्रतमव्यापृतं शस्त्रमिव मालिन्यमङ्गीकुरुते सारथ्यम् । यतः ।

**सहस्रहयरश्मीनां घर्षणोत्थकिणाविलम् ।।**
**करं सङ्ग्रसते पश्य मार्द्दवं मर्द्दयत्किणम् ।।११।।**

(इति हस्तं दर्शयति ।)

**चित्रसेनः** - अयि मातले एवमेव ममापि सङ्गीतं तव सारथ्यमनुकरोति ।

**यथा कान्तवियोगेन कान्तायाः कुचकुड्मलौ ।।**
**कार्श्यमागच्छतस्तद्वदावयोः कर्मणी स्फुटम् ।।१२।।**

पश्य ।

**वीणागुणसङ्घट्टनघटितकिणं मेऽङ्गुलीद्वयं वृणुते ।।**
**मार्द्दवमिव वर्षवरं कन्यायुगलं सुखप्रणाशकरम् ।।१३।।**

(इति वामहस्तस्य तर्जनीमध्यमे प्रदर्शयति ।)

**मातलिः** - (दृष्ट्वा ।) आवयोस्तौल्यं संवृत्तम् । अत्रापि स्वामिवियोग एव कारणम् । यतः ।

**कान्तापरिजनगेहोद्यानाभरणानि भर्तृवियुतानि ।।**
**यद्यपि निसर्गरम्याण्यतिशोभां प्राप्नुवन्ति नो तदपि ।।१४।।**

**चित्रसेनः** - तथ्यमाह भवाननुभूयते साम्प्रतम् ।

**मातलिः** - (सास्रम् ।) क्व तावदधुना स्वामिनः स्थित्या भवितव्यम् । किञ्च वृत्तमेतदज्ञानमेव दुनोति हृदयम् ।

**चित्रसेनः** - अयि मातले वृथा त्वं क्लेशं मा कृथाः । श्रुतं मया नारदमित्रस्य तुम्बरोर्मुखाच्छुभोदर्कं स्वामिनो वृत्तम् ।

**मातलिः** - (साभिलाषम् ।) कीदृशं  कीदृशम् ।

**चित्रसेनः** - शृणु तावत्कथयामि ।

**लेखालेखशिखामणिं हि पुरतः कृत्वा खलोपद्रुताः**
**खद्योतप्रतिमाः खवर्त्मपथिकास्ते लेखलेखालयम् ।।**
**गत्वा तं करुणाकरं सुखकरं नत्वाऽश्रुपूर्णाननाः**
**स्तुत्वा प्राहुरतीव गद्गदगिरा दुःखं स्वशत्रूत्थितम् ।।१५।।**

**मातलिः** - (सधैर्यम् ।) ततस्ततः ।

**चित्रसेनः** - ततः ।

**श्रुत्वा वृत्तं दैत्यसङ्घाधमस्य**
**कृत्वा हास्यं किञ्चिदाह प्रभुस्तान् ।।**
**हत्वा तं वः शं विधातास्मि नूनं**
**दत्वा भक्तिं तस्य पुत्राय पुत्राः ।।१६।।**

**मातलिः** - (सानन्दम् ।) ततस्ततः ।

**चित्रसेनः** - ततः प्रभुवाक्सुधासारनिर्वापितक्लेशकुकूलदहनास्तं निहतमेव नियतं मन्यमानास्तं सहस्रकृत्वः प्रणेमुः ।

**ततः समुत्थाय दिवौकसस्ते**
**तद्दर्शनाह्लादनिमग्नचित्ताः ।।**
**लब्ध्वाऽभ्यनुज्ञां पुरुषोत्तमात्तं**
**द्रष्टुं प्रवृत्ताः किल लोकमाद्यम् ।।१७।।**

**मातलिः** - ततस्ततः ।

**चित्रसेनः** - ततो विविधरत्ननिकुरम्बकरनिकरकिर्मीरितानेकसौधधोरणी-शोभातिरेकास्पदं रमणीयरमणीजनपरिचितोद्यानबहुविधविहङ्गमञ्जुल-कूजितं तत्रत्यसुमनःसमूहरसरसनरसिकभृङ्गसङ्घझङ्कृतिमुखरितं मधुरशिशिरस्वच्छामृतपरिपूरितमणिगणनिर्मितवापीशत-सम्भूतशतपत्रपरम्परापरागपटलप्रपूर्णं भृशविशदकुरुविन्दादि-वृन्दांशुसन्दोहदुरालोककनकप्रचुरविमानावलीवास्तव्य-विलासिजनजेगीयमानस्वभर्तृभगवद्यशःश्रवणतिरस्कृतश्रोतृ-शमलशतमकुण्ठप्रभावं वैकुण्ठीकृतहृद्यक्लेशं हृद्यं वैकुण्ठं लोकोत्तमं प्रसमीक्ष्य सुमनःसन्दोहोऽतितरां मोदं बिभराम्बभूव । किञ्च ।

**तत्रत्यरत्नगणमङ्कुरमण्डलेषु**
**रूपं प्रभोर्बहुविधं परिभाति शश्वत् ।।**
**एतं भ्रमं परिहरन्ति तदीयलोकाः**
**श्रीवत्सकौस्तुभविहीनतयैव यस्मिन् ।।१८।।**

**चन्द्रार्कनेत्रयुगलस्य हरेर्हि लोके**
**लोको न कर्मनिरतः किल.....**

**मातलिः** - **. ...तत्र हेतुः ।।**

**चित्रसेनः** -

**दिक्कालभागरहितत्वमधोक्षजस्य**
**भक्तिर्भृशं....**

**मातलिः** - **.... ननु भवानिदमाह तथ्यम् ।।१९।।**

**चित्रसेनः** - लोकः ।

**सुवर्णबाहुल्ययुतस्तथापि**
**वर्णैर्विहीनः किल तद्विगर्ह्यम् ।।**
**इतीव भर्त्रा द्विजमुख्य एकस्-**
**सामप्रगायी परिरक्षितोऽस्ति ।।२०।।**

किञ्च ।

**चाञ्चल्यं वयसो लक्ष्म्याश्चोरयद्भिर्निरीक्षणैः ।।**
**तत्रत्यललनानां वै चोराभावो निराकृतः ।।२१।।**

**मातलिः** - (सश्लाघम् ।) अहो लालित्यं लोकोत्तमस्य । अहो वर्णनवैदग्ध्यं वैणिकोत्तमस्य ।

**चित्रसेनः** -

**अवैरवत्त्वान्निजदिव्यशस्त्र-**
**वैयर्थ्यसम्पादकता स्वलोके ।।**
**तस्माद् धरण्यामवतारयोगो**
**हरेर्मुहुः सार्थयितुं हितानि ।।२२।।**

अन्यच्च ।

**वायौ जले हिमर्त्तुस्तेजसि दक्षिणविलोचने ग्रीष्मः ।।**
**विष्णोः कृपावलोके प्रावृड्धारागृहे स्थिता किञ्च ।।२३।।**
**शरदास्ते वामेक्षण इह कुमुदेषूदकेषु वदनेषु ।।**
**नानोद्यानमहीरुहसरलसमीरेषु माधवः शश्वत् ।।२४।।**

**मातलिः** - (सशिरःकम्पम् ।) अहो प्रभावो लोकचूडामणेर्वैकुण्ठस्य । यच्छ्रवणमात्रेण भक्त्या समं समुज्जृम्भते दिदृक्षा । (इति रोमाञ्चं नाटयति।)

**चित्रसेनः** - किं बहुना ।

**यत्रत्यरत्ननिवहोत्थमहःप्ररोहैस्-**
**सन्ताडिताक्षिनिवहा अनिमेषवत्त्वम् ।।**
**देवा निनिन्दुरथ लब्धसुखा ननन्दुर्-**
**दुर्दर्शदर्शनवशाद्धरिलोक उच्चैः ।।२५।।**

पुनः । (परावृत्य ।)

**कृत्वाऽनिशं प्रतिकृतिं बहुमानतो यां**
**सम्पूजयन्ति विधिना निधिसङ्गमाप्तुम् ।।**
**तां लोकमातरमहो हरिसेवनोत्कां**
**दृष्ट्वा ययुः परमविस्मयमिन्द्रमुख्याः ।।२६।।**

किञ्च ।

**दृष्ट्वा सहस्रदललोचनमुद्गिरन्त-**
**मानन्दवीक्षणसुधां स सुधाशनेशः ।।**
**अक्ष्णां सहस्रममलं ह्यनिमेषवत्त्वं**
**साफल्यमाप्तमिति सम्मनुते स्म तत्र ।।२७।।**

**मातलिः** - (सभक्त्युन्मेषम् ।) अहो भाग्यवत्त्वमस्मत्स्वामिनः । यतः ।

**तप्त्वापि दुष्करतपः पुरुषोत्तमं यं**
**ध्यानस्थितं न ददृशुः किल योगिनश्च ।।**
**ब्रह्मादयोऽपि सहसा स निरीक्ष्य सम्यक्-**
**तं श्रीनिवासमतुलं सुखमाप तत्र ।।२८।।**

**चित्रसेनः** - (सभक्त्युन्मेषम् ।) एवमेव ।

**मातलिः** - ततस्ततः ।

**चित्रसेनः** - ततः परं तत्रत्यामन्दाऽऽनन्दसन्दोहसन्दारितदुःसहदुःखनिवहा महारत्नशिखरिशिखरात्स्फटिकमिव स्वार्थं समवाप्य पुनस्तस्माल्लोकान्निवृत्य तामेव प्रकृतिं भेजुः मेनिरे चैवम् ।

**गोत्रसगोत्रं गात्रं प्रहारपात्रं प्रभोर्ध्रुवं भविता ।।**
**अस्मत्सुखतृणदात्रं दैत्यपतेरिति महाशया देवाः ।।२९।।**

**मातलिः** - अयि चित्रसेन शुभोदर्कस्वाम्युदन्तश्रावणेन साम्प्रतं प्रत्युज्जीवितोऽहम् । निर्वापितश्च वागमृतसेचनेन चिन्तासप्तार्चिः । सुखयिष्यति च मामद्य निद्रा ।

**चित्रसेनः** - (सस्मितम् ।) अयि मातले निद्रा सुखयिष्यतीति को वा विशेषः ।

शृणु ।

**धृत्वा नेत्रयुगं सरागमथ याऽमन्दाक्षमेषा स्वयं**
**सान्निध्याख्यमधुप्रघूर्णमचिरात्सर्वं विधत्ते जनम् ।।**
**निद्रा वारवधूपमा परमयं भेदो विनार्थं सदे-**
**यं लोके विवशीकरोति नियतं यत्र क्व वा प्राणिनम् ।।३०।।**

**मातलिः** - (सस्मितम् ।) एवमेव । (ऊर्ध्वमवलोक्य ।) चित्रसेन पश्य पश्य प्रकृतेऽस्मच्चिन्ताचित्रभानुरिव वासरोऽप्यवसानमवाप । संयोगिजनसुखाकरश्च भगवान्निशाकरस्सरागः समलङ्करोति तुङ्गमेतदुदयाद्रिशृङ्गम् ।

**चित्रसेनः** - मातले अहं त्वेवं मन्ये ।

**दृष्ट्वा निशापतिरसौ स्वनिशां प्रदोष-**
**तारावलीविरलताकलितां हि शून्ये ।।**
**वारुण्यदीर्घवसुमित्रकराग्रघृष्ट-**
**नीलाम्बरामतिरुषा प्रबभूव ताम्रः ।।३१।।**

**मातलिः** - (सश्लाघम् ।) सम्यगुत्प्रेक्षितं वैणिकविदग्धवरिष्ठेन । परमहं तावदित्थं मन्ये ।

**रात्रौ मेचकराहुचोरभयतो व्योमाख्यपेटीपुटे**
**ताराकीलकघट्टिते बहुतरं चन्द्राख्यसालान्विते ।।**
**धृत्वा सूर्यमहामणिं विधिरहो निद्राति धत्तेऽथ तं**
**पूर्वाद्र्यापणके पुनर्वसुभरप्राप्त्यै प्रभाते सदा ।।३२।।**

**चित्रसेनः** - (सशिरःकम्पम् ।) मातले सारथ्यकर्मनिरतेनापि त्वया अपूर्वमिदं वाग्वैदग्ध्यं विपुलीकृतं तेन जितोऽहम् ।

**मातलिः** - (सस्मितं तूष्णीं तिष्ठति ।)

(नेपथ्ये शङ्खध्वनिः ।)

**चित्रसेनः** - (श्रुत्वा । सचकितम् ।) केन किल ध्मातः ।

**प्रलयजलदचण्डध्वाननिध्वानसर्गः**
**प्रबलरिपुहृदब्जोच्छेददन्तावलेन्द्रः ।।**
**सकलभुवनगर्तोत्पूरकः शब्दवार्भिः**
**प्रचलमवनिदेशं संविधाताऽथ शङ्खः ।।३३।।**

**मातलिः** - (साशङ्कम् । नेपथ्याभिमुखमवलोक्य ।) अये सम्प्राप्तोऽयं दिविषद्-व्यसनद्रुमालवालः करालः क्रव्यादचक्रचक्रवर्त्ती हिरण्यकशिपुः । तन्नात्र स्थातुमुचितम् ।

(इति निष्क्रान्तौ ।)

**(शुद्धविष्कम्भकः ।)**

(ततः प्रविशति शण्डामर्काभ्यामुष्ट्रगन्धेन चानुगम्यमानो हिरण्यकशिपुः ।)

(प्रविश्य ।)

**शण्डः** - महाराज भवतः कुत आगमनम् ।

**हिरण्यकशिपुः** - गुरुपुत्र अस्मन्निसर्गशत्रोर्विष्णोरायतनात् ।

**शण्डः** - तर्हि कथं युद्धचिह्नानि न पश्यामि । यतः ।

**सङ्गरपरिश्रमोत्थान् स्वेदकणाञ् शोणिमानमप्यक्ष्णोः ।।**
**संरम्भं चाद्रीं किल गदां न पश्यामि शत्रुजयपिशुनाम् ।।३४।।**

**हिरण्यकशिपुः** - (उच्चैर्विहस्य ।) एवमेव । भीरुतरस्य तस्य लोकं प्राप्य वैयर्थ्यमालम्ब्यतेऽनया गदया । तेन निष्प्रभेयम् । यथाहि ।

**दर्शनमात्राच्छुक्रोत्स्रष्टुरनल्पप्रसादकृत्तल्पम् ।।**
**प्राप्य स्वलङ्कृताऽपि प्रेष्ठतमापि प्रयाति निष्प्रभताम् ।।३५।।**

**शण्डः** - (सस्मितम् ।) हुम् एवं चेत्किं तत्रत्यं वृत्तम् ।

**हिरण्यकशिपुः** - (विहस्य ।) किं कथयामि । वीरजनहास्यनटीलास्यरङ्गीभूतं तस्य भीरोर्वृत्तम् । तथापि शृणु तावत् ।

**पूर्वं सम्पद्धीनान् भिक्षुकसङ्घप्रपूरिताँल्लोकान् ।।**
**वीरविहीनान् क्रमशः सत्यादीन् द्रागुपेक्ष्य दीनतरान् ।।३६।।**

**प्राप्तो निसर्गशत्रोः सदनं संरम्भभरवशादेकः ।।**
**समराजिररसरसिको भ्रात्रानृण्यं समेतुकामोऽहम् ।।३७।।**

**शण्डः** - (सोत्साहम् ।) ततस्ततः ।

**हिरण्यकशिपुः** - ततः ।

**ध्मातः शङ्खवरो मया सुखकरो वीराग्रगानां सदा**
**शस्त्रक्षुण्णशरीररक्तसरितां तीरे बलाकोपमः ।।**
**यः सांवर्त्तकमेघचण्डनिनदध्वानाख्यवार्भिर्भृशं**
**प्रौढोत्साहमहीरुहस्य सहसा प्रोल्लासकः सत्वरम् ।।३८।।**

**शण्डः** - ततस्ततः ।

**हिरण्यकशिपुः** -

**ततोऽतिभीरुं सहसाऽवगम्य**
**स्वस्वामिनं किंपुरमेतदुच्चैः ।।**
**शङ्खप्रतिध्वानमिषेण रोषाज्-**
**जगर्ज वैकुण्ठमिव प्रवीरः ।।३९।।**

**शण्डः** - ततस्ततः ।

**हिरण्यकशिपुः** - ततः पीताम्बरेणेव विमलकलधौतप्राकारेण परिवेष्टितस्य पौरचेतः प्रपूर्योत्कूलितप्रेमरसप्रवाहेणेव निर्मलजलप्रवाहेण परिपूरितया परिखया समावृतस्य नववनरुहमालिकयेव तदुद्भूतकमलावल्या संवेष्टितस्य तदुपासनतत्परैर्मूर्त्तिमद्भिर्ग्रहैरिव तत्तत्प्रियरत्ननिकररचितैर्व्योमयानैः सङ्कुलस्य सर्वर्तुसुखसम्पदामेकास्पदस्य लोकचूडामणेर्वैकुण्ठस्योत्तुङ्गं गोपुरमहं प्राविशम् ।

**ततोऽतिबभ्राम मनो मदीयं**
**तत्रत्यलोकान् प्रसमीक्ष्य सर्वान् ।।**
**विष्णुस्वरूपान्मम को रिपुः स्या-**
**देतेष्विति प्राक्प्रविचारघूर्णम् ।।४०।।**

**शण्डः** - (साश्चर्यम् ।) ततस्ततः ।

**हिरण्यकशिपुः -**

**ततो विनिश्चित्य निसर्गधर्मं**
**लोकस्य वैकुण्ठसमाह्वयस्य ।।**
**क्षणं स्वमात्मानमवेक्ष्य तादृग्-**
**रूपं तदा धैर्यमथाध्यगच्छम् ।।४१।।**

**शण्डः** - (स्वगतम् ।) अहो माहात्म्यं भगवल्लोकस्य यत्क्षणमात्रसान्निध्यात् पापिनेऽपि प्रयच्छति प्रभोस्सारूप्यम् ।

**हिरण्यकशिपुः -** किञ्च ।

**संस्मृत्य नैसर्गिकवैरभावं**
**विष्णोस्तदा दीनतरानुपेक्ष्य ।।**
**तत्रत्यलोकान् समगां तदीयं**
**वेश्मोत्तमं रत्नकरैर्विचित्रम् ।।४२।।**

**शण्डः** - ततस्ततः ।

**हिरण्यकशिपुः -** ततः ।

**चन्द्रार्कतुल्यसुमहःप्रभवैरनन्तै-**
**रत्नैर्दृढं विरचिते भवने तदीये ।।**
**शून्ये भृशं परिजनैर्भ्रमता सभार्यो**
**दृष्टो न तत्र स मया किल कान्दिशीकः ।।४३।।**

**दृष्टः कश्चित्पक्षी दीनतरस्तस्य वाहनं कोणे ।।**
**पृष्टो नावोचद् द्राग्भीरुतरोऽस्तीत्युपेक्षितोऽस्माभिः ।।४४।।**

**शण्डः** - ततस्ततः ।

**हिरण्यकशिपुः -**

**भो भो भीरुतरातिवञ्चकवर स्त्रैणाग्रगण्य क्व वा**
**लीनस्त्वं सह भार्यया प्रियतरं हत्वा मम भ्रातरम् ।।**

प्राप्तोऽहं तव पूर्वशत्रुरधुना युद्धाय तत्सत्वरं
प्रत्यक्षो भव दैत्यसूदनसमाख्यां युक्तयुक्तां कुरु ।।४५।।

प्राप्ते युद्धावसरे वीरवरेणातिबलवता यो यः ।।
विमुखो भवति स विमुखः परलोकाद्वीरबिरुदतो भवति ।।४६।।

भीत्या निलीनभावो व्यर्थस्ते मायया कुहकवर्य ।।
त्यक्ष्यामि क्वापि न ते प्राणानिलमथ भुजङ्गसदृशोऽहम् ।।४७।।

इत्युच्चैराक्षिप्तः खदिराङ्गारोष्णतीक्ष्णवचनचयैः ।।
तदपि प्रतिवचनं नो लब्धं शत्रुः कुतस्तरां प्राप्यः ।।४८।।

**शण्डः** - ततस्ततः ।

**हिरण्यकशिपुः** -

ततो मदुक्तिप्रतिशब्दमात्र-
प्रपूरितादद्राक् सदनात् स्वशत्रोः ।।
निर्गत्य सोऽन्विष्ट इह त्रिलोक्यां
तथापि गन्धो न तदीय आप्तः ।।४९।।

तेनाहमेवं किल तर्कयामि
रिपुः सभार्यः समगाद्विनाशम् ।।
भीत्या ह्रिया स्वाजयशङ्कया वा
समाविलान्तःकरणस्स्वयं सः ।।५०।।

**शण्डः** - (सहर्षमिव ।) एवमेव ।

**उष्ट्रगन्धः** - (सहर्षम् ।) एवमेव नात्र सन्देहगन्धोऽपि । (इति करतालं दत्वा नृत्यति ।) (तौ प्रति ।) निर्गताऽस्मत्स्वामिनः शिरश्छेदस्य भीतिः । (इति सानन्दं पुनर्नृत्यति ।)

**हिरण्यकशिपुः** - धिङ्मूर्ख निषेधमुखेनाऽमङ्गलमुदाहरसि ।

**उष्ट्रगन्धः** - कथमिदममङ्गलम् । भवतः शिरश्छेदो भविष्यतीत्युक्तं चेदमङ्गलम् ।

**हिरण्यकशिपुः** - (सक्रोधम् । प्रहारोद्योगं नाटयन् ।) आः पाप वैधेयाग्रगण्य निषिद्धोऽप्य-

मङ्गलं व्याहरसि ।

**उष्ट्रगन्धः** - (सभयं तच्चरणयोर्निपतति ।)

**उभौ** - क्षम्यतां क्षम्यतां ग्राम्योऽयम् ।

**हिरण्यकशिपुः** - (सविमर्शम् ।) सत्यमुक्तम् । मूर्खोऽयं समुपेक्षणीयः ।

**उभौ** - राजन्नभिनन्दनीयोऽयं वासरः शर्वरी च । यतो निस्सपत्नं साम्राज्यं संवृत्तं महाराजस्य ।

**हिरण्यकशिपुः** - (सविनयम् ।) सर्वं गुरुचरणानां प्रसादस्य प्रभावः ।

**उभौ** - भवद्भक्तिसुधावृष्टिरेव विपुलयति गुरुप्रसादमहीरुहम् ।

**हिरण्यकशिपुः** - (सहसा पतति ।)

**सर्वेऽपि** - समाश्वसितु समाश्वसितु महाराजः ।

(इत्युत्थापयन्ति ।)

**हिरण्यकशिपुः** - (सावधानो भवति ।)

**उभौ** - महाराज किमिदमभूत् ।

**हिरण्यकशिपुः** - (सलज्जाक्रोधम् ।) गुरुपुत्र ।

**स्वप्नो वाभूत चेष्टेयं विनिश्चेतुं न शक्नुमः ।।**

**उभौ** -

**महाराजेन सहसा ह्यनुभूतं किमिहाद्भुतम् ।।५१।।**

**हिरण्यकशिपुः** - (साश्चर्यम् ।) गुरुपुत्र किं ब्रवीमि ।

**मद्धृद्यरोमविवरान्मशको निःसृत्य सिंहरूपः सन् ।।**
**दत्वा हृदये लत्तां बलेन लीनोऽम्बरे क्षणाच्चित्रम् ।।५२।।**

**उभौ** - (स्वगतम् ।) वृन्दारकवृन्दामन्दरक्षणविचक्षणस्य कमलेक्षणस्यैवैतद्धृदयदेशान्निःसृतस्येयं चेष्टा तेनैव स क्वापि नोपलब्धः । भवतु एवं तावत्कथयामि । (प्रकाशम् ।) आः ज्ञातम् । परेतस्य भवद्रिपोरियं चेष्टा ।

**हिरण्यकशिपुः -** (सहर्षम् ।) एवमेव । विनष्टो मे तज्जीवितस्य सन्देहः । (इति साटोपं परिक्रामति ।)

**उभौ -** महाराज निवेदयितुं गच्छावस्तावदानन्दजनकं वृत्तान्तं भवन्निःसपत्नसाम्राज्यस्य गुरुभ्यः । (इति निष्क्रान्तौ ।)

**हिरण्यकशिपुः -** रे उष्ट्रगन्ध पश्य तावदस्मत्करोन्नत्या देवगण इव शीतकरकरोन्नत्या क्षीयते निशान्धकारः ।

**उष्ट्रगन्धः -** अयमपि देवः स्वकरेण व्याप्नोति त्रिलोकीं काऽत्र महाराजस्य श्लाघा ।

**हिरण्यकशिपुः -** (सन्यक्कारम् ।) धिग्वैधेय अयमपां गोलकः प्रकाशयति तेजोगोलकस्य सूर्यस्य करसम्पर्कात् त्रिलोकीम् ।

**उष्ट्रगन्धः -** (सस्मितम् ।) एवं चेत्तृषितेन मयोपलब्धं पानीयपात्रम् । (इत्युड्डयनं नाटयति ।)

**हिरण्यकशिपुः -** (तं हस्तेनाकृष्य ।) रे जाल्म घृतमपि दीपपात्रधृतं कोऽपि पिबति ।

**उष्ट्रगन्धः -** हुम् एवं तर्हि निवृत्तोऽस्मादशुचिकर्मणः ।

**हिरण्यकशिपुः -** पश्य । अहं तावदित्थं मन्ये ।

**मलिनां रचयति बहुधा रात्रिं ध्वान्तः द्विपेन्द्र इति रोषात् ।।**
**रात्रीशद्वीपिवरो दारयति द्राक्तमुत्कराग्रस्सः ।।५३।।**

**उष्ट्रगन्धः -** (सभयम् ।) त्रायतां त्रायतां महाराजः । मामप्युत्करो द्वीपी विदारयिष्यति । (इति हिरण्यकशिपोः पार्श्वं प्रविशति ।)

**हिरण्यकशिपुः -** (हस्तेनापसार्य ।) धिङ्मूर्ख उत्प्रेक्षेयं वाक्चातुर्यम् ।

**उष्ट्रगन्धः -** हुम् इत्थं तर्हि जीवितोऽस्मि ।

**हिरण्यकशिपुः -** (अङ्गुल्या निर्दिश्य ।)

**पयोधरान्तरात्सद्योनिःसृताभिः सखेऽधुना ।।**
**चन्द्रांशुक्षीरधाराभिर्द्यौः कृता निचिकीसमा ।।५४।।**

**उष्ट्रगन्धः -** (मुखं प्रसार्य तिष्ठति ।)

**हिरण्यकशिपुः -** अरे किमिदं करोषि ।

**उष्ट्रगन्धः -** क्षीरपानम् ।

**हिरण्यकशिपुः -** (सस्मितम् ।) (हस्तेनाकृष्य ।) अलमलमुपहसनीयचरितेन । शृणु तावन्मन्निदेशम् ।

**उष्ट्रगन्धः -** हुं शृणोमि कथयतु महाराजः ।

**हिरण्यकशिपुः -**

**दृष्ट्वा चन्द्रमतीवसौख्यजनकं किञ्चानुभूयाधुना**
**पुष्णयत्पुष्पपरागमिश्रमलयप्रान्तीयमन्दानिलम् ।।**
**वीक्ष्योद्यानलताद्रुमैः प्रमिलिताः स्मृत्वा वियुक्तां प्रियां**
**कामाह्वातिगदेन मित्र विवशीभूतोऽस्मि चिन्तापरः ।।५५।।**

**उष्ट्रगन्धः -** तर्ह्याकारणीयावश्विनौ धन्वन्तरिर्वा ।

**हिरण्यकशिपुः -** (कामवैक्लव्यं निरूपयन् ।) अलमलमुपहासेन प्रतापयति मां प्रियाविरहार्कः ।

**उष्ट्रगन्धः -** तर्ह्युपनयामि तच्छान्त्यै सुधाम् ।

**हिरण्यकशिपुः -** सखे मुग्धोऽसि ।

**विरहार्कातपशान्त्यै प्रियामुखेन्दोः सुधैव पर्याप्ता ।।**
**अन्या सा नहि मुख्या किन्तु विषस्यानुजा हि सम्प्राप्या ।।५६।।**

**उष्ट्रगन्धः -** (स्वगतम् ।) कामं कामकाण्डप्रहारप्रपीडितो महाराजः । (प्रकाशम् ।) महाराज तर्हि किमनुष्ठेयं मया ।

**हिरण्यकशिपुः -** (सकामवैक्लव्यम् ।) सखे दृग्गोचरतां प्रापणीया मत्प्राणप्रिया चिरवियुक्ता कयाधुः केनाप्युपायेन । साम्प्रतम् । मुहुर्मुहुः ।

**चलनरभसवल्गन्नासिकाकल्पमुक्ता-**
**फलकृतबहुशोभं स्वेदयुक्तं नताङ्ग्याः ।।**
**सुरतसुखत ईषन्मीलिताक्षं स्मरामि**
**स्मितयुतमतिरम्यं सीत्क्रियाकारि वक्त्रम् ।।५७।।**

(इति ध्यानं नाटयति । पुनः सोन्मादम् ।)

**नहि नहि शब्दं वदने नीवीबन्धे स्ववामकरकमलम् ।।**
**अपरं स्तनयोर्दधती रमयति रमते सुकेशपाशेयम् ।।५७ क।।**

**उष्ट्रगन्धः** - (स्वगतम् ।) अहो कीदृशीमवस्थां प्रापितो महाराजोऽनङ्गेन । (प्रकाशम् ।) महाराज अयमहमागतस्त्वत्प्रियामानीय ।

(इति गमनोद्योगं नाटयति ।)

**हिरण्यकशिपुः** - (अक्षिणी उन्मील्य ।)

**हा प्रिये व्यसनाम्भोधौ त्यक्त्वा मां क्व गताऽधुना ।।**
**आनन्दाद्रिमहाशृङ्गात् पातितोऽहं कथं त्वया ।।५८।।**

(इति मूर्च्छां नाटयति ।)

**उष्ट्रगन्धः** - समाश्वसितु समाश्वसितु महाराजः ।

(इति पटान्तेन वीजयति ।)

**हिरण्यकशिपुः** - (समाश्वस्य ।) सखे प्रियादर्शनामृतसेकेन समुज्जीवय माम् ।

**उष्ट्रगन्धः** - महाराज धैर्यमवलम्बस्वायमहमागतस्त्वत्प्रियामानीय । (इति गमनोद्योगं नाटयन्नेपथ्याभिमुखमवलोक्य ।) अये कोऽसौ जरद्भल्लूक इव यष्टिपाणिः शनैः शनैरित एवाभिवर्तते ।

**हिरण्यकशिपुः** - (विलोक्य ।) सखे मा मैवं कोऽपि स्थविरस्तापसः । अनुपहसनीयाः खलु महानुभावाः ।

(ततः प्रविशति यथानिर्दिष्टः पत्रहस्तस्तापसः ।)

(प्रविश्य ।)

**तापसः** - अये क्व तावद्दैत्येश्वरस्य स्थितिर्भवेत् । (कतिचित्पदानि गत्वा ।) अये अयमसौ दैत्येश्वरस्तावदुपसर्पामि । (इत्युपसर्पति ।)

**हिरण्यकशिपुः** - भगवन्नभिवादये ।

**तापसः** - विजयी भव ।

**हिरण्यकशिपुः** - (सविनयम् ।) अत्र भवतः किमर्थं कुत आगमनमस्मिन्नवसरे ।

**तापसः** - भवदर्थं देवर्षेराश्रमात् ।

**हिरण्यकशिपुः** - तर्ह्यनुगृहीतोऽहं कथयतु भवान् स्वाभिप्रेतम् ।

**तापसः** - आज्ञप्तं भगवता नारदेन यद्वत्सा कयाधुर्बहुतिथं समुषिता मदाश्रमपदेऽधुना निःसपत्नसाम्राज्यस्य भवतोऽङ्कमलङ्करोत्विति ।

**हिरण्यकशिपुः** - (साकूतस्मितमुष्ट्रगन्धं समवलोक्य तं प्रति ।) भगवन्ननुगृहीतोऽहं भगवता नारदेन कालोचिताज्ञासुधावृष्टिपातनेन । सखे उष्ट्रगन्ध गच्छ तावद्देवीमानेतुं भगवता साकम् ।

**उष्ट्रगन्धः** - यथाह दैत्येश्वरः ।

(इति गमनोद्योगं नाटयतः ।)

**तापसः** - (परावृत्य ।) अयि दैत्येश्वर सम्भ्रमाद्विस्मृतं खलु मया । तया दत्तं पत्रमिदम् । तद् गृहाण । (इति पत्रमर्पयति ।)

**हिरण्यकशिपुः** - (सानन्दं गृह्णाति ।)

**उभौ** - गच्छावस्तावद्धवन्निदेशं सफलीकर्तुम् ।

(इति निष्क्रान्तौ ।)

**हिरण्यकशिपुः** - (सोत्कण्ठं पत्रं वाचयति ।)

**चेतस्त्वच्चरणारविन्दयुगलेऽजस्रं मिलिन्दायते**
**पातुं किञ्च तवाधुनाधरसुधां ग्रीष्मर्त्तुपान्थायते ।।**
**अङ्गस्पर्शसुधाफलं समशितुं क्षुत्क्षामकीरायते**
**किञ्च त्वन्मुखशीतरश्मिममलं द्रष्टुं चकोरायते ।।५९।।**

(सोत्कण्ठं तद्ध्यानं नाटयित्वा । पत्रं नेत्रयोर्हृदये च धारयन् ।)

**युक्ता पुष्पात् फलप्राप्तिः काले चित्रं तु पत्रतः ।।**
**आनन्दफलसम्भूतिः स्नेहयोगेन तत्क्षणम् ।।६०।।**

(पुनः कामबाधां निरूप्य ।) अहह ।

**पत्रमिदं दयिते तव पत्रं किल पञ्चपत्त्रिणो जैत्रम् ।।**
**नोचेदस्येक्षणतस्ते लग्ना मयि कथं शितास्तस्य ।।६१।।**

(पुनस्तत्स्मृतिमभिनयन् निःश्वस्य ।) हा प्रिये कुरु तावत्त्वन्मुखचन्द्रदर्शनेन विरहार्कातपप्रतप्तं मां शीतलम् । (इति पुनर्ध्यानं नाटयति । पुनः सानङ्गकश्मलं चन्द्रमवलोक्य ।)

**उत्पाद्योत्पाद्य दुःखं विरहिजनहृदि त्वं हिमांशो करैः**
**स्वैस्तच्छ्वासोच्छ्वासयोगान्मुकुरतलमिव प्राप्तमालिन्य कोऽसि ॥**
**तस्माल्लोके प्रसिद्धो मलिन इति सदा पक्ष एषोऽस्ति चिह्नं**
**दृश्यं लोके कलङ्कं तदतिखरदृगुल्काकिणं शुक्लपक्षे ॥६२॥**

(पुनः सर्वतोऽवलोक्य ।) (कामबाधां रूपयन् ।) कथमद्यापि चिरयत्युष्ट्रगन्धः ।

(ततः प्रविशति उष्ट्रगन्धः ।)

(प्रविश्य । पदान्तरं गत्वा । हिरण्यकशिपुमवलोक्य ।)

**उष्ट्रगन्धः** - (ससम्भ्रमम् ।) महाराज दिष्ट्या वर्द्धसे । सम्प्राप्तेयं देवी कयाधुः ।

**हिरण्यकशिपुः** - (ससम्भ्रमाह्लादम् ।) क्व सम्प्राप्ता क्व सम्प्राप्ता ।

**उष्ट्रगन्धः** - अन्तःपुरम् ।

**हिरण्यकशिपुः** - धिग्जाल्म किमर्थं तत्र नीता ।

**उष्ट्रगन्धः** - न मया नीता ।

**हिरण्यकशिपुः** - तर्हि केन नीता ।

**उष्ट्रगन्धः** - तस्याश्चेतसा ।

**हिरण्यकशिपुः** - तत्र किं कारणम् ।

**उष्ट्रगन्धः** - मानः ।

**हिरण्यकशिपुः** - तस्यापि किं बीजम् ।

**उष्ट्रगन्धः** - किमपि वर्तते ।

**हिरण्यकशिपुः** - तत्कथय ।

**उष्ट्रगन्धः** - नाऽहं मूर्खः यत्पारितोषिकमन्तरा कथयामि ।

**हिरण्यकशिपुः** - (हस्ताभरणं दातुमिच्छति ।)

**उष्ट्रगन्धः** - (सस्मितम् ।)अलमलमलङ्करणेनास्मिन्नवसरे ।

**हिरण्यकशिपुः** - तर्हि कस्मिन्नवसरे ।

**उष्ट्रगन्धः** - यदा देवी स्वभुजपाशकनकहारेण महाराजस्य कण्ठदेशमलङ्करिष्यति ।

**हिरण्यकशिपुः** - (सस्मितम् ।) यथोचितमभिहितं परं तस्य बीजं किं तत्कथय ।

**उष्ट्रगन्धः** - कथयामि ।

**हिरण्यकशिपुः** - हुं हुं कथय ।

**उष्ट्रगन्धः** - तर्हि सन्नद्धो भव ।

**हिरण्यकशिपुः** - (सस्मितम् ।) किमत्र युद्धारम्भः ।

**उष्ट्रगन्धः** - हुं पञ्चशरमहायुद्धारम्भः ।

**हिरण्यकशिपुः** - तर्हि तस्य महत्त्वं कथम् ।

**उष्ट्रगन्धः** - यतः प्रसिद्धसमरे तु सदैव महाराजस्य जयः । अत्र तु महाराजस्यापि पराजयः ।

**हिरण्यकशिपुः** - तर्हि कस्य जयः ।

**उष्ट्रगन्धः** - (साटोपम् ।) अस्मद्देव्याः ।

**हिरण्यकशिपुः** - (सस्मितम् ।) अलमलं वाग्डम्बरताण्डवेन । कथय तस्य बीजम् ।

**उष्ट्रगन्धः** - तर्हि कथयामि ।

**हिरण्यकशिपुः** - हुं कथय सत्वरम् ।

**उष्ट्रगन्धः** - महाराजस्य अपराधः ।

**हिरण्यकशिपुः** - (क्षणं विमृश्य ।) सखे किं बहुनाऽणुमात्रमपि न पश्यामीति ।

**उष्ट्रगन्धः** - किमणुमात्रमपि न पश्यामि अस्ति पलाण्डुग्रन्थ्यपेक्षयापि बृहत् ।

**हिरण्यकशिपुः** - धिङ्मूर्ख नायमुपहासस्यावसरः । जानासि चेत्कथय ।

**उष्ट्रगन्धः** - जानामि सर्वं कथयामि सर्वम् ।

**हिरण्यकशिपुः -** तर्हि कथय किमिति विलम्बसे ।

**उष्ट्रगन्धः -** शृणु तावत् । उक्तं हि पथि देव्या । हञ्जे मालविके पुरुषाः किल स्वार्थकुशलाः । पश्य पश्य । लब्धाभ्युदयेन आर्यपुत्रेण सर्वात्मनाऽद्यपर्यन्तं साम्राज्यलक्ष्मीरेवान्विष्टा कदाचित् क्वापि प्रसङ्गान्तरेऽपि नाहं संस्मृता तेन सैव रमयत्वार्यपुत्रं किं मया दुर्भगया ।

**हिरण्यकशिपुः -** ततस्ततः ।

**उष्ट्रगन्धः -** ततश्चेट्योक्तम् । शान्तं पापं शान्तं पापम् । भट्टिनि मैवं सम्भावयितुमर्हसि प्राणप्रिया किल भवती महाराजस्य परं नाशनीयाः शत्रवः तदुद्योगपरः किल महाराजः ।

**हिरण्यकशिपुः -** साधु चेटि साधु समयोचितमेवाभिहितम् । ततस्ततः ।

**उष्ट्रगन्धः -** तत उक्तं देव्या । हञ्जे कृतं कृतं सन्धिविधानवैदग्ध्येन । एह्येहि तावदन्तःपुरं गच्छावः इत्यन्तःपुरं गन्तुं प्रवृत्ता ।

**हिरण्यकशिपुः -** ततस्ततः ।

**उष्ट्रगन्धः -** ततो मयाऽनुनीतयापि देव्यैवमुक्तम् । रे धूर्त कथय मद्वचनादार्यपुत्रं यत्ससुखं साम्राज्यलक्ष्म्या सह रमतामार्यपुत्रः ।

**हिरण्यकशिपुः -** ततस्ततः ।

**उष्ट्रगन्धः -** ततस्सप्रणयकोपा सा सम्प्रविष्टा स्वान्तःपुरम् । अहं हृतधन इव सम्प्राप्तोऽस्मि महाराजान्तिकम् ।

**हिरण्यकशिपुः -** (क्षणं विमृश्य ।) (सवैलक्ष्यम् ।) सखे सत्यं मानस्य बीजं नूनमहमपराधी देव्या अस्मि । (इति सविचारं तूष्णीं तिष्ठति ।)

**उष्ट्रगन्धः -** (साट्टहासं करतालं दत्वा ।) जितं जितमस्मद्देव्या । (इति बहुतरं नृत्यति ।)

**हिरण्यकशिपुः -** रे ग्राम्य कृतं कृतमनेन नृत्येन ।

**उष्ट्रगन्धः -** तर्हि किं करोमि ।

**हिरण्यकशिपुः -** मदुक्तं शृणु तावत् ।

**उष्ट्रगन्धः** - (स्वहस्ताभ्यां कर्णौ धृत्वा ।) कथयतु महाराजः । शृणोमि तावत् ।

**हिरण्यकशिपुः** - साम्प्रतं किमनुष्ठेयम् ।

**उष्ट्रगन्धः** - अनुनेतव्या देवी ।

**हिरण्यकशिपुः** - तर्हि त्वमेव गत्वाऽनुनय देवीम् ।

**उष्ट्रगन्धः** - (सपरितोषम् ।) हुम् अहमनुनयामि । अद्यप्रभृति महाराजस्य भक्ष्यमपि प्रतिदिनमहमेव भक्षिष्यामि कृतं महाराजस्य दन्तघर्षणश्रमेण ।

**हिरण्यकशिपुः** - धिक् पुरुषपशो त्वया भक्षितं चेन्मम कथं तृप्तिर्भवेत् ।

**उष्ट्रगन्धः** - तर्हि ममानुनयेन देवी कथं सन्तुष्येत् ।

**हिरण्यकशिपुः** - (सस्मितम् ।) रे महाधूर्तोऽसि ।

**उष्ट्रगन्धः** - महाराजस्य प्रसादात् ।

**हिरण्यकशिपुः** - (सस्मितम् ।) कृतं वाक्चातुर्येण एहि तावद्वयमेव प्रसादयामो देवीम् ।

**उष्ट्रगन्धः** - हुम् इत्थं चेदयमागतोऽहम् । (इत्यग्रे धावति ।)

**हिरण्यकशिपुः** - सखे दर्शय तावद्देव्यधिष्ठितस्यान्तःपुरस्य मार्गम् ।

**उष्ट्रगन्धः** - इत इतः महाराजः । (इति परिक्रामतः ।)

(नेपथ्ये ।)

भट्टिनि नैवमभ्यसूयितुमर्हसि महाराजं शत्रुनिषूदनम् ।

(ततः प्रविशति चेट्यानुनीयमाना मानवती कयाधुः ।)

(प्रविश्य ।)

**चेटी** - भट्टिनि नैवमभ्यसूयितुमर्हसि महाराजं शत्रुनिषूदनम् ।

**कयाधुः** - (वामकरतलनिहितकपोला सास्रं तूष्णीं तिष्ठति ।)

**चेटी** - (स्वहस्ताभ्यां स्वाङ्कगतौ तत्पादौ विमर्दयन्ती पुनस्सविनयम् ।) प्रसीद भट्टिनि प्रसीद नायमवसरो मानस्य सम्भावनीयस्साम्प्रतं चिरविरहमिहिरतापतप्तो महाराजः ।

**कयाधुः** - (स्वचरणाभ्यां समुत्सारयति चेटीम् ।)

**चेटी** - (पुनः शुश्रूषते ।)

**उष्ट्रगन्धः** - (पदान्तरं गत्वा ।) इदं देव्यधिष्ठितमन्तःपुरम् । तत्प्रविशतु महाराजः । अहं तावद्बहिःपुरं प्रविशामि । (इति गन्तुमिच्छति ।)

**हिरण्यकशिपुः** - (वस्त्राञ्चले धृत्वा ।) तिष्ठ रे वैधेय तिष्ठ क्व गच्छसि ।

**उष्ट्रगन्धः** - तपश्चर्याप्रसङ्गेन युद्धप्रसङ्गेन वा महाराजेन किं बधिरायितं मया पूर्वमेवोक्तं बहिःपुरमिति ।

**हिरण्यकशिपुः** - (सस्मितम् ।) रे मुखर क्वास्ति बहिःपुरम् ।

**उष्ट्रगन्धः** - (अङ्गुल्या स्वगृहमिव दर्शयति ।)

**हिरण्यकशिपुः** - अरे कथमस्य संज्ञा बहिःपुरमिति ।

**उष्ट्रगन्धः** - हुं न जानाति महाराजः ।

**हिरण्यकशिपुः** - नहि नहि कथय ।

**उष्ट्रगन्धः** - सर्वैरदृश्या देवी सदाऽस्मिँस्तिष्ठतीत्यन्तःपुरम् । अहं तावदन्धैरपि दृश्यः यत्र तिष्ठामि तद्बहिःपुरम् ।

**हिरण्यकशिपुः** - (सशिरःकम्पम् । सोपहासम् ।) भवता सम्यक्समर्थितं परमन्धैस्त्वं कथं दृश्यः ।

**उष्ट्रगन्धः** - कोऽत्र सन्देहः । करपरामर्शेन ।

**हिरण्यकशिपुः** - (विहस्य ।) अलमलं मौखर्यशौर्येण । एहि तावद्देवीमनुनेतुं त्वमपि सहायो भव ।

**उष्ट्रगन्धः** - हुं देवीमनुनेतुं सहायो भवामि परं तत्र न भवामि ।

**हिरण्यकशिपुः** - रे तत्र क्व ।

**उष्ट्रगन्धः** - देव्या रोषात् पादप्रहारस्य लाभे ।

**हिरण्यकशिपुः** - (सक्रोधमिव ।) आः मित्रापसद अनुचिततरं ब्रूषे । (इति हस्तेन धृत्वा अन्तःपुरप्रवेशं नाटयति ।)

**चेटी** - (दूरादुभौ दृष्ट्वा । ससम्भ्रममुत्थाय दूरं तिष्ठति ।)

**कयाधुः** - (अधोदृष्टिः तथैव तिष्ठति ।)

**हिरण्यकशिपुः** - (कयाधुमवलोक्य सानन्दम् ।) सखे पश्य पश्य एतत्सामयिकमपि देव्या रामणीयकम् । यतः ।

**नासाभरणविहीनं कज्जलमसृणाश्रुकलुषितं वदनम् ।।**
**रोषादुपेतरागं राकाचन्द्रं तिरस्करोत्येतत् ।।६३।।**

**उष्ट्रगन्धः** - एवमेव यदाह महाराजः ।

**हिरण्यकशिपुः** - (पुनः सानन्दम् ।) सखे पश्य पश्य

**करतलधृतमुखमस्या मीलितनेत्रं सुकुन्तलं भाति ।।**
**कमलास्तरणे सुप्तः शरदिन्दुर्भृङ्गसेवितः किन्नु ।।६४।।**

(पुनर्निर्वर्ण्य ।)

**यद्वा कचचयराहुग्रस्तो मुखशर्वरीपतिः प्राप्तः ।।**
**भयतः करकमलाङ्कं नूनं जलजत्वसम्बन्धात् ।।६५।।**

**अथवा मुखेन्दुजलदो वर्षति शृङ्गाररसभरं नूनम् ।।**
**अञ्जनमलिनाश्रुझरव्याजात्प्रणयप्रकोपवर्षर्तौ ।।६६।।**

**उष्ट्रगन्धः** - महाराज नेदं बन्दित्वं मानमोचनाय प्रगल्भं देव्यास्तदुपसर्पतु भवानेनां शुश्रूषितुम् ।

**हिरण्यकशिपुः** - (सस्मितम् ।) यदाह मित्रम् । (इत्युपसृत्य । सविनयम् ।)

**अपराधक्षारोदधिमज्जनविवशं हि मज्जनोऽयमिति ।।**
**मत्वा स्वकरे धृत्वैनं जनमुद्धर्त्तुमर्हसि क्षिप्रम् ।।६७।।**

**कयाधुः** - (तथैव तूष्णीं तिष्ठति ।)

**उष्ट्रगन्धः** - महाराज मया पूर्वमेवोक्तं नायं बन्दित्वस्यावसरः ।

**मालविका** - (अपवार्य।) रे हतक तूष्णीं तिष्ठ किमिति देवीप्रणयकोपाग्नौ वाक्सर्पिः सिञ्चसि ।

**उष्ट्रगन्धः** - (सस्मितं तूष्णीं तिष्ठति ।)

**हिरण्यकशिपुः** - (सानुनयम् ।)

**मानिनि शिरीषमृद्वी वपुषा त्वं चेतसाऽसि किं कठिना ।।**
**तत्त्वणुमात्रं शक्तं काठिन्यं गुरुतरं कथं वोढुम् ।।६८।।**

(इति तस्या मुखं चिबुके धृत्वोन्नमय्यालोकते ।)

**कयाधुः** - (सभ्रूभङ्गं परावृत्य तिष्ठति ।)

**हिरण्यकशिपुः** - (स्वगतम् ।) हन्त कथं प्रियामनुनयामि ।

(प्रकाशम् ।)

**अपराधिनो हि शुद्धिः शास्त्रे दण्डेन कीर्तिता तन्वि ।।**
**तं त्वं कर्तुं प्रभवस्यपराधिनि मयि कुरुष्व तच्छीघ्रम् ।।६९।।**

(इति सानुनयं स्वाङ्के धृत्वा तत्पादौ मृद्नाति ।)

**कयाधुः** - (पादावाकृष्य ।)

**(जनान्तिकम् ।)**

हञ्जे मालविके किमर्थममुं जनं वृजिनाम्भोधौ मज्जयितुमयं समारम्भः । (इति सास्रं तूष्णीं तिष्ठति ।)

**हिरण्यकशिपुः** -

**परिचरति दक्षिणेऽङ्गे ननु वा मे वाममङ्गकं भवति ।।**
**सागः किं वद भामिनि शपथस्ते मम सुधोपमैर्वचनैः ।।७०।।**

**कयाधुः** - (स्वगतम् ।) हन्त किं करोम्यनुल्लङ्घनीय आर्यपुत्रस्य शपथः । (प्रकाशम् ।) आर्यपुत्र किं ब्रवीमि सर्वमपराध्यते मम दौर्भाग्येन ।

**हिरण्यकशिपुः** - प्राणप्रिये कृतं रौक्ष्येण त्रायस्वामुञ्जनं पञ्चशरपीडितम् । (इति तत्पादयोर्निपतति ।)

**कयाधुः** - (सस्मितं पादावाकृष्य परावृत्य तूष्णीं तिष्ठति ।)

**उष्ट्रगन्धः** - (साट्टहासम् ।) (स्वकरद्वयेन स्वनितम्बद्वयमास्फालयन् ।) अनुनीता महाराजेन देवी । अनुनीता महाराजेन देवी । (इति नृत्यति ।)

**हिरण्यकशिपुः** - (स्वमुखमुन्नमय्य तस्याः मुखं किञ्चित्सप्रसादमवलोक्य सहसा तां हस्तेनाकृष्य समालिङ्गति ।)

**कयाधुः** - (सभयलज्जम् । मुखमानमय्य तूष्णीं समालिङ्गति ।)

**हिरण्यकशिपुः** - (आलिङ्गनसुखमभिनीय ।)

**पाटलजलघनसारप्रमिलितमलयोत्थपङ्क इन्दुकराः ।।**
**मलयानिलश्च नलिनं नव्योशीरं प्रतप्तशान्तिविधौ ।।७१।।**

**न प्रभवन्त्येतानि प्रभुर्यथा सङ्गमः प्रियाङ्गस्य ।।**
**चिरकालात्सम्प्राप्तः किसलयमृदुलस्य कृच्छ्रतः सपदि ।।७२।।**

(इति तन्मुखं चिबुके धृत्वाऽवलोकयन् ।)

दृश्यन्ते किल ।

**मुखचन्द्रक्षेत्रवरे सात्त्विकभावाख्यजलधरोत्सृष्टैः ।।**
**स्वेदजलैर्विपुलास्ते तव शृङ्गारस्याङ्कुराः पुलकसञ्ज्ञाः ।।७३।।**

(इति चुम्बनोद्योगं नाटयति ।)

**कयाधुः** - (मुखं परावृत्यापवार्य च ।) आर्यपुत्र मा मैवम् । पश्यत्युष्ट्रगन्धो मालविका च ।

**हिरण्यकशिपुः** - भवतु प्रिये एहि चत्वरे ज्योत्स्नासुखमनुभवावः ।

**कयाधुः** - यथाभिलषितमार्यपुत्रस्य ।

(इति अजिरगमनं सर्वेऽपि नाटयन्ति ।)

**हिरण्यकशिपुः** - इदमासनमलङ्करोतु देवी ।

**कयाधुः** - (सस्मितम् ।) पूर्वमार्यपुत्रोऽलङ्करोत्वासनम् ।

**हिरण्यकशिपुः** - यथाभिरोचते प्रियायै । (इत्यासने तया सहोपविशति ।)

(चेट्युष्ट्रगन्धौ पुरतस्तिष्ठतः ।)

**हिरण्यकशिपुः** - (ऊद्ध्र्वमवलोक्य ।) अयि प्रिये

**किंवा पश्याम्यमुं चन्द्रं त्वन्मुखेन्दुं सुनिर्मलम् ।।**
**अयं तापकरः क्वापि सर्वदा सुखदस्त्वयम् ।।७४।।**

(इति स्वहस्तेन तन्मुखं परामृशति ।)

**कयाधुः** - (सविनयमञ्जलिं बद्ध्वा ।) आर्यपुत्र क्षणं मामनुजानात्वात्मानं प्रसाधयितुम् ।

**हिरण्यकशिपुः** - प्रिये नाहं त्यक्तुं प्रभवामि । तावत्केनात्मानं विनोदयामि ।

**कयाधुः** - तावदक्षक्रीडासुखमनुभवत्वार्यपुत्रः । इयमहमागता ।

**हिरण्यकशिपुः** - यथाभिलषितम् ।

**कयाधुः** - (उत्थाय ।) चेटि एह्येहि आत्मानं प्रसाधयितुं गच्छावः ।

(इति निष्क्रान्ते ।)

**हिरण्यकशिपुः** - सखे उष्ट्रगन्ध एहि तावदक्षक्रीडयाऽऽत्मानं विनोदयावः ।

**उष्ट्रगन्धः** - किं क्रीडा सग्लहा निर्ग्लहा वा ।

**हिरण्यकशिपुः** - धिग्लोलुप विनोदार्थं क्रीडायां कीदृशो ग्लहः ।

**उष्ट्रगन्धः** - कृतं हस्तघर्षणेन । (इति निर्वेदं नाटयति ।)

**हिरण्यकशिपुः** - (सस्मितम् ।) रे किमिति निर्विण्णः । एह्येहि सग्लहं क्रीडिष्यावः ।

**उष्ट्रगन्धः** - (सहर्षम् ।) एवं चेत्सन्नद्धोऽहम् । (इति क्रीडोपस्करान् स्थापयन् ।) महाराज को वा ग्लहः ।

**हिरण्यकशिपुः** - (स्वाङ्गुलीयकं दर्शयति ।)

**उष्ट्रगन्धः** - (सोत्कण्ठम् ।) किमिदं किमिदं पश्यामि ।

**हिरण्यकशिपुः** - (अङ्गुलीयकमुत्तार्य दर्शयति ।)

**उष्ट्रगन्धः** - (स्वहस्ते गृहीत्वावलोक्य ।) अहह बीभत्समिदम् । (इति पुनस्तदङ्के प्रक्षिपति ।)

**हिरण्यकशिपुः** - रे नृपशो किमिदमस्ति यद्बीभत्सं बीभत्समिति जल्पसि ।

**उष्ट्रगन्धः** - बिडालाक्षिगोलकः ।

**हिरण्यकशिपुः** - धिङ्मूर्ख अनर्घ्यमिदं वैदूर्यरत्नम् ।

**उष्ट्रगन्धः** - हुं तर्हीदमेवास्तु ग्लहः ।

(इत्युभावक्षक्रीडां नाटयतः ।)

**हिरण्यकशिपुः** - रे पश्य पश्य । जितं मया देहि ग्लहं किं ददासि ।

**उष्ट्रगन्धः** - (सत्वरं स्वाङ्गुल्यङ्गुष्ठाभ्यामेकं नेत्रं विस्फार्य तत्समीपमुपसर्पति ।)

**हिरण्यकशिपुः** - रे जाल्म किमिदं करोषि ।

**उष्ट्रगन्धः** - आः न ज्ञातं महाराजेन ।

**हिरण्यकशिपुः** - नहि नहि ।

**उष्ट्रगन्धः** - महाराजस्य ग्लहो बिडालनेत्रोपमं रत्नम् इदं साक्षान्मदीयं नेत्रमनर्घ्यतरं तद्गृह्णातु महाराजः ।

**हिरण्यकशिपुः** - धिक् साहसिक कृतं त्वद्ग्लहेन ।

(इति पुनरक्षक्रीडां नाटयतः ।)

**उष्ट्रगन्धः** - (अक्षान् प्रक्षिप्य ।) महाराज पश्य पश्य जितं मया । (इत्युत्थाय नृत्यति ।)

**हिरण्यकशिपुः** - अलमलं ताण्डवपाण्डित्येन । (इति हस्ते गृहीत्वोपवेश्याङ्गुलीयकं प्रयच्छति ।)

**उष्ट्रगन्धः** - (सहर्षं धारयति ।)

(नेपथ्ये ।)

हञ्जे मालविके कृतापराधाहं चिरवियुक्तस्य महाराजस्य मुखमपि सम्यगवलोकयितुं न पारयामि कुतः पुनर्भाषितुम् ।

(ततः प्रविशति चेट्यानुगम्यमाना स्वलङ्कृता कयाधुः ।)

(प्रविश्य ।)

**कयाधुः** - (‘‘**हञ्जे मालविके**’’ इत्यादि पठति ।)

**चेटी** - भट्टिनि कृतं लज्जया भयेन च सम्भावनीयः प्राणप्रियो महाराजो निःशङ्कम् ।

**कयाधुः** - हुं जानामि परं लज्जा भयं च शत्रू प्रबलौ । (पदान्तरं गत्वा ।) हञ्जे चेटि अद्य किल महाराजस्य भृशमुपहासपात्रं भविष्यामि ।

**चेटी** - कथमिव ।

**कयाधुः** - किं ब्रवीमि चिरतरं प्रसाधनस्यानभ्यासात् ।

**चेटी** - कृतं कृतमनया शङ्कया ।

**कयाधुः** - कथमिव ।

**चेटी** - भट्टिनि प्रणयप्रकोपकलुषितं ते मुखकमलं विलोक्यैव विवशीभूतो महाराजः किं पुनस्स्वलङ्कृतम् ।

**कयाधुः** - (सगर्वं सस्मितं तूष्णीं तिष्ठति ।) (कतिचित्पदानि गत्वा ।)

**चेटी** - भट्टिनि अयं महाराज उष्ट्रगन्धेन सह क्रीडन् तिष्ठति तदुपसर्पतु भवती ।

**कयाधुः** - (सलज्जमधोदृष्टिरुपसर्पति ।)

**उष्ट्रगन्धः** - महाराज सम्प्राप्तेयं देवी ।

**हिरण्यकशिपुः** - (सानन्दम् । तामवलोक्य ।) सखे कृतं कृतमक्षक्रीडया सम्प्राप्तं मम नेत्रासेचनकम् । (इति तां करे धृत्वाङ्क उपवेशयति ।)

**उष्ट्रगन्धः** - हुं कृतमक्षक्रीडया भवतु साम्प्रतमक्षिक्रीडा ।

**कयाधुः** - (सलज्जं वदनं नमयति ।)

**हिरण्यकशिपुः** - कीदृशोऽयं मुखरः पशुः ।

**उष्ट्रगन्धः** - भवन्मित्रं किल ।

**हिरण्यकशिपुः** - (कयाधोर्मुखमवलोकयन् ।)

**प्रिये सुधायते वक्त्रं मद्दृष्टियुगले तव ।।**
**इदञ्च तत्र दृग्दोषात् साम्प्रतं गरलायते ।।७५।।**

(इति तस्या मुखं परामृशति ।)

(पुनः सोत्कण्ठम् ।) साम्प्रतं मेलनं तव ।

**स्वप्नं पश्यामि वा सत्यं तन्निश्चेतुं न शक्यते ।।**
**उन्मेषैः सत्यवद्भाति निमेषैः स्वप्नवत् प्रिये ।।७६।।**

(इत्यानन्दाश्रूणि नाटयति ।)

**कयाधुः** - (समालिङ्ग्य ।) आर्य कृतं कृतमनेन वैक्लव्येन ।

**नाहं क्षणमपि दूरा विहाय पदाम्बुजं तव प्रेष्ठ ।।**
**वपुषा वा मनसा वाऽमनसा जानीहि निश्चितं तत्त्वम् ।।७७।।**

**हिरण्यकशिपुः -** प्रिये एवमेव ।

**चेतो जानाति वै चेतः किं भाषणपरिश्रमैः ।।**
**प्रीत्या सहृदयानां द्राग्दूरस्थानामपि स्फुटम् ।।७८।।**

(इति पुनरालिङ्गति ।)

**कयाधुः -** (सविनयमञ्जलिं बद्ध्वा ।) बहुदुःखमनुभूतमार्यपुत्रेण मत्कृते तत्क्षन्तव्यम् ।

**हिरण्यकशिपुः -** प्रिये कृतं कृतमनया शङ्कया ।

**दुःखिनोऽपि तु ते धन्याः स्नेहदुःखेन दुःखिताः ।।**
**सुखिनस्तेऽप्यधन्या ये स्नेहमार्गाविदो जनाः ।।७९।।**

**कयाधुः -** (सपरितोषम् ।) आर्यपुत्र सहृदयानामयमेव नैसर्गिकः सम्प्रदायः ।

**उष्ट्रगन्धः -** महाराज सम्प्राप्तोऽयमवसरः पारितोषिकस्य ।

**चेटी -** भद्र समयोचितं ब्रवीषि परिजनानामयमेव लाभस्यावसरः ।

**हिरण्यकशिपुः -** सखे समय एव स्मारितं तत्त्वया ।

(इत्युष्ट्रगन्धाय चेट्यै चाभरणानि ददाति ।)

**उभौ -** महाप्रसादः । (इति धारयतः ।)

**हिरण्यकशिपुः -** (पुनस्तस्या मुखमवलोक्य ।) त्वया किल ।

**द्विदलः शृङ्गाररसः कृतसीमन्तकसुकैश्यमिषतो वै ।।**
**शिरसा ध्रियते रागः स्थाय्यपि सिन्दूरकपटतो नित्यम् ।।८०।।**

**कयाधुः -** (सस्मितं तूष्णीं तिष्ठति ।)

**हिरण्यकशिपुः -** (पुनर्निपुणं निरीक्ष्य ।)

**कज्जलकलङ्कितं ते वीटीरागान्वितं सुगौरमये ।।**
**कान्ते कान्तं वदनं राकौदयिकं मृगाङ्कमनुकुरुते ।।८१।।**

**कयाधुः** - (सगर्वस्मितम् ।) आर्यपुत्र अलमलं वाक्चातुर्येण ।

**उष्ट्रगन्धः** - पश्यतु महाराजः । जरत्तापसश्मश्रूण्यनुकुर्वन्ति चन्द्रकराः ।

**हिरण्यकशिपुः** - (सहासम् ।) अहो वर्णननैपुण्यं ग्राम्योत्तमस्य । (सर्वतोऽवलोक्य ।)

**शुभ्रांशुजलदोत्सृष्टज्योत्स्नाक्षीरप्रसारतः ।।**
**लोकैः पश्य पयोम्भोधिझषव्रातायितं सखे ।।८२।।**

**उष्ट्रगन्धः** - हुं सत्यमुक्तम् । (इति हस्तौ प्रसार्य धूनयति ।)

**हिरण्यकशिपुः** - रे वैधेय किं कुरुषे ।

**उष्ट्रगन्धः** - झषोऽहं तरामि क्षीराम्भोधौ । (चेटीं प्रति ।) भद्रे मालविके त्वमपि तर । (इति भ्रूसञ्ज्ञया प्रेरयति ।)

**चेटी** - (सलज्जास्मितम् । तूष्णीं तिष्ठति ।)

**हिरण्यकशिपुः** - धूर्ततरोऽयं मुखरः ।

**कयाधुः** - भद्र उष्ट्रगन्ध किमासवक्षीबोऽसि ।

**उष्ट्रगन्धः** - देवि महाराजस्य तव च कृपाकटाक्षासवेन नित्यमहं क्षीबः । (इति मदस्खलितं तिष्ठति ।)

**हिरण्यकशिपुः** - (स्वगतम् ।) हन्त काममसमशरवेदनासवो विवशीकरोति माम् । तदलं कालातिपातेन । भवतु । (प्रकाशम् ।) (निद्रामुद्रामभिनीय ।)

**स्थित्वा नेत्रयुगे सदा वितनुते रागं सुखं मानसे**
**स्वे देशेऽपि विदेशकेऽपि च सुखे दुःखेऽपि नो मुञ्चति ।।**
**किं ब्रूमो बहुवृद्धतामुपगते बाल्येऽपि जन्मान्तरे**

**कयाधुः** - (सचकितम् ।)

**किं साऽन्या गृहिणी....**

**हिरण्यकशिपुः** - (सस्मितम् ।)

**.... नहि प्रियतमे निद्राऽतिभद्रा मम ।।८३।।**

**कयाधुः** - (सकामस्मितम् । हिरण्यकशिपोर्मुखमवलोक्य ।) आर्यपुत्र मामपि

बाधते निद्रा ।

**उष्ट्रगन्धः** - देवि किं सापत्न्यभावात् ।

**हिरण्यकशिपुः** - धिङ्मूर्ख बहुनिशातिक्रमात् ।

**कयाधुः** - यथाह आर्यपुत्रस्तथैव ।

**हिरण्यकशिपुः** - तर्ह्येहि शय्यागृहं प्रविशावः ।

(इति निष्क्रान्ताः सर्वे ।)

**।। इति श्रीमन्नृसिंहविजयनाम्नि महानाटके षष्ठोऽङ्कः ।।**

